दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लचतुर्थी
श्रावण 31 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-297 | 1 | अगस्त 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राष्ट्रपतिः द्रौपदीमुर्मुः अशीतितमे स्वातन्त्र्यदिने राष्ट्रिय-युद्धस्मारके वीरान् श्रद्धाञ्जलिम् अददात्

3 'व्यवस्थापरिवर्तनात् स्वावलम्बनं प्रति हिमाचलम्', स्वतन्त्रतादिवसे मुख्यमन्त्रिणः राज्यस्तरीय-सम्बोधनम्, अनेकासां जनकल्याण-योजनानाम् उद्घोषणम्

8 "भर्तृहरेः वैराग्यकथा" डॉ.वर्षा

## कृत्स्ने हि देशे अशीतितमस्य स्वतन्त्रता-दिवसस्य महोल्लासेन आचरणम्, रक्तदुर्गे प्रधानमन्त्रिणा विहितं राष्ट्रध्वजारोहणम्



देशः स्वकीयम् अशीतितमं स्वतन्त्रता-दिवसम् समाचरति। प्रधानमन्त्री नरेन्द्रमोदी देहल्याः ऐतिहासिक-स्थलात् लाल किला इत्यस्मात् स्वतन्त्रता-दिवस-समारोहस्य नेतृत्वम् अकरोत्। तस्य आगमनावसरे प्रथमवारं लाल किला इत्यत्र वन्दे मातरम् इति राष्ट्रिय-गीतं प्रस्तुतम् । राष्ट्रध्वजारोहणावसरे एकविंशतिः आग्नेयास्त्र-ध्वनिभिः अभिनन्दनम् अभवत् भारतीय-वायुसेनायाः द्वाभ्यां Mi-17 उदग्र-यानाभ्यां पुष्पवृष्टिश्च सञ्जाता। अस्य वर्षस्य एषः समारोहः युव-शक्त्यै समर्पितः । यच्च सप्तचत्वारिंशदधिक-द्विसहस्रतमं वर्षं यावत् विकसित-भारतस्य निर्माणे तरूण-भारतस्य योगदानम् आमानयति । रक्तदुर्गस्य प्राचीरात् राष्ट्र सम्बोधयन् प्रधानमन्त्री मोदी रक्तदुर्गे वन्दे मातरम् इत्यस्य गानम् ऐतिहासिकः क्षणः इत्यवर्णयत्। सः अवदत् यत् राष्ट्रं महता उत्साहेन नव-सङ्कल्पैः च सह अग्रे सरति । प्रधानमन्त्री मोदी न्यगादीत् यत् विगतेषु द्वादशवर्षेषु देशस्य कोटिशः नागरिकाः स्वकीयेन दृढ-सङ्कल्पेन समर्पणेन च राष्ट्रम् उन्नत-शिखरे प्रापयितुं सर्वविध-प्रयासान् कृतवन्तः। विविधेषु क्षेत्रेषु प्राप्ताः उपलब्धयः प्रकाशयन् सः अवदत् यत् द्वादशवर्षेषु रक्षोत्पादने प्रायः चतुर्गुणिता, खादी-ग्रामोद्योग-उत्पादने पञ्चगुणिता, इलैक्ट्रॉनिक-निर्माण-क्षेत्रे सप्तगुणिता आधुनिक-रेल-निर्माण-क्षेत्रे एकविंशति-गुणिता अथ च सञ्चार-दूरभाष निर्माण-क्षेत्रे त्रयस्त्रिंशत्-गुणिता वृद्धिः सञ्जाता। सः असूचयत् यत् अन्तर्जाल-उपयोक्तॄणां संख्यायां चतुर्गुणिता अथ च अङ्कीय-वित्तीय-विनिमयेषु च शतगुणिता वृद्धिः अभवत्। प्रधानमन्त्रिणा निर्धन-मध्यमवर्गीय कुटुम्बानां कृते निःशुल्क-प्रातिभासिक-प्रशिक्षणम् अथ च आगामि-वर्षे कोट्यधिक-युवभ्यः एआई-कौशल-प्रदानस्य कृता उद्घोषणा ।
प्रधानमन्त्रिणा निर्धन-मध्यमवर्गीय कुटुम्बानां कृते विविध-सार्वजनिक-परीक्षाभ्यः निःशुल्क-ऑनलाइन-प्रशिक्षणस्य घोषणाम् अकरोत्। सः अवदत् यत् शीर्ष-अध्यापकानां निर्देशने उच्च-गुणवत्ता-युक्त-शिक्षां सर्वसुलभां विधातुम् एतत् एकं क्रान्तिकारि-पदक्षेपम् अस्ति, येन मध्यमवर्गीय कुटुम्बानां सहस्रकोटि-रूप्यकाणां रक्षणं भविष्यति। प्रधानमन्त्रिणा स्पष्टीकृतं यत् आगामि-एकस्मिन् वर्षे एककोटि-युवभ्यः कृत्रिम बुद्धिमत्ता-कौशले प्रशिक्षणं प्रदास्यते, येन ते वैश्विक एआई-क्षेत्रे नेतृत्वं कर्तुं समर्थाः भवेयुः। सः अवदत् यत् भारतेन व्ययः, गुणवत्ता, कौशलं चेत्येतेषु त्रिषु मुख्य स्तम्भेषु विशेषावधानं दातव्यम् । प्रधानमन्त्री नरेन्द्रमोदी महत्वपूर्ण-खनिजेषु सर्वकारस्य विशेषावधानं प्रकाशयन् अवदत् यत् आधुनिक-प्रौद्योगिकी पूर्णतया महत्वपूर्ण-खनिजानाम् उपरि आश्रिता विद्यते, भारतं च अस्मिन् क्षेत्रे स्वस्थानं सुरक्षितुं सक्रियतया कार्यं करोति। सः असूचयत् यत् भारतेन राष्ट्रिय-महत्वपूर्ण-खनिजाभियानम् प्रारब्धम् अथ च महत्वपूर्ण-खनिज-वीथेश्च घोषणा कृता ।



प्रधानमन्त्रिणा प्रोदीरितं यत् बहुभिः देशैः सह सन्धयः क्रियन्ते, विश्वस्य च विश्वासः भारते निरन्तरं वर्धते । प्रधानमन्त्री मोदी अवदत् यत् सप्तचत्त्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् विकसित-भारतस्य लक्ष्यं प्राप्नुवन् भारतेन अनेकेषाम् अभूतपूर्व-संकटानां सम्मुखीकरणं कृतम्। कोविड्-वैश्विक-सङ्क्रमणस्य अथ तदनन्तरं यूक्रेन-पश्चिम-एशिया-क्षेत्रयोः सञ्जातानां संघर्षाणां वर्णनं सः अकरोत्। प्रधानमन्त्रिणा स्पष्टीकृतं यत् विश्वस्मिन् प्रत्येकं राष्ट्रं स्वकीय-हितानां रक्षणाय प्रयतते, किन्तु दौर्भाग्येन अस्मिन् संकट काले कैश्चिद्भिः देशैः स्व-प्रभुत्व-प्रदर्शनार्थं संसाधनानाम् अस्त्रीकरणस्य कुत्सितं षड्यन्त्रं कृतम् । प्रधानमन्त्री सर्वेभ्यः दलेभ्यः सविनयं निवेदितवान् यत् ते संसदि राज्य-विधानसभासु च राजनैतिक-कलहं परित्यज्य महिला आरक्षणस्य क्रियान्वयनाय सहयोगं कुर्युः ।

## अद्यतनीयं सुभाषितम्

**आम्रं छित्वा कुठारेण,निम्बं परिचरेतु यः।**
**यश्चैनं पयसा सिञ्चेत् नैवास्य मधुरो भवेत्।।**

भावार्थ- एक आम के वृक्ष को कुल्हाडी से काट कर उसके बदले एक नीम के वृक्ष को जो भी व्यक्ति पाल पोस कर बड़ा करता हो, वह चाहे उस वृक्ष को दूध से कितना ही क्यों न सींच ले फिर भी उसमें मिठास उत्पन्न नहीं होगी।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## प्रधानमन्त्री नरेन्द्रमोदी राजघाट-समाधिस्थले महात्मा-गान्धिने श्रद्धाञ्जलिं समर्पितवान्



प्रधानमन्त्री नरेन्द्रमोदी राजघाट-समाधिस्थले महात्मा-गान्धिने श्रद्धाञ्जलिं समर्पितवान्। एकस्मिन् सामाजिक-सञ्चार-पटले स्वविचारान् प्रकटयन् श्रीमोदी प्रतिपादितवान् यत् सर्वकारः सदैव महात्मागान्धिनः आदर्श-कार्येभ्यः प्रेरणां गृह्णाति । प्रधानमन्त्रिणा स्पष्टीकृतं यत् सर्वकारः प्रत्येकस्य नागरिकस्य प्रगतये, समुत्थानार्थं च सततं कार्यं विधास्यति, येन भारतम् उत्तरोत्तरं वर्धयेदिति।

## प्रधानमन्त्री नरेन्द्रमोदी अरविन्द महोदयं तस्य जयन्त्यवसरे व्यस्मरत्।

प्रधानमन्त्री नरेन्द्रमोदी अरविन्द महोदयं तस्य जयन्त्यवसरे व्यस्मरत्। एकस्मिन् सामाजिक-सञ्चार-पटलीय-सन्देशे प्रधानमन्त्री अरविन्द महोदयम् महान् दार्शनिकः, प्रखर-राष्ट्रवादी, कविः, चिन्तकश्च इत्यादिभिः उपाधिभिः वर्णितवान्। तेन प्रोक्तं यत् श्री अरविन्दः स्वकीयम् सम्पूर्ण जीवनं भारतस्य स्वतन्त्रतायै अथ समग्र मानवतायाः समुत्थानाय च व्यजुहोत्। प्रधानमन्त्रिणा उक्तं यत् विविध-विषयेषु तस्य विचाराः अद्यापि विश्वस्मिन् जनान् निरन्तरं प्रेरयन्ति।

## राष्ट्रपतिः द्रौपदीमुर्मुः अशीतितमे स्वातन्त्र्यदिने राष्ट्रिय-युद्धस्मारके वीरान् श्रद्धाञ्जलिम् अददात्



राष्ट्रपतिः द्रौपदीमुर्मुः अशीतितमे स्वातन्त्र्यदिने राष्ट्रिय-युद्धस्मारके वीरान् श्रद्धाञ्जलिम् अददात्। राष्ट्रपतिः स्मारके पुष्पमालां समर्पयित्वा हुतात्मवीरान् श्रद्धाञ्जलिम् अर्पितवती। रक्षामन्त्री राजनाथसिंहः, रक्षासचिवः सञ्जय सेठः, रक्षासचिवः जनरल एन्. एस्. राजा सुब्रमण्यम्, सेनाप्रमुखः जनरल धीरज् सेठः, नौसेनाध्यक्षः ऐडमिरल् कृष्णा स्वामिनाथन्, वायुसेना प्रमुखः एयर्-चीफ मार्शल् अमरप्रीत सिङ्घः, रक्षासचिवः राजेशकुमारसिङ्घः च अस्मिन् अवसरे उपस्थिताः आसन्।

## इण्डोनेशिया-देशे फ्लोर्स-इति तटस्य समीपे भूकम्पेन मृतानां सङ्ख्या अष्टत्रिंशत् यावत् वर्धिता



इण्डोनेशिया-देशे फ्लोर्स-इति तटस्य समीपे सप्त दशांशोत्तर सप्त तीव्रतायां भूकम्पेन मृतानां सङ्ख्या अष्टत्रिंशत् यावत् वर्धिता। प्रचण्डभूकम्पस्य अनन्तरं उद्धार-दलानि सर्वाधिक प्रभावित-क्षेत्रेषु गन्तुं प्रयतन्ते। देशस्य अनेकेषु भागेषु एक-मीटर्-मितात् न्यून-परिमाणस्य सुनामी-तरङ्गानां सूचनापि प्राप्तास्ति। भूकम्पस्य प्रायः त्रिहोरानन्तरम् एव सुनामी-सूचना प्रत्याख्याता।

## अरुणाचलप्रदेशे आकस्मिकजलप्लावेन पञ्च सैनिकाः निमग्नाः, अपर-सुबनसिरीमण्डले भूस्खलनेन चत्वारः मृताः

ईटानगरम्: अरुणाचलप्रदेशस्य दिबाङ्ग-उपत्यकामण्डले ह्यः सायं जातेन मूसलाधारेण वृष्टिपातेन सहसोत्पन्ने आकस्मिकजलप्लावे भारतीयसेनायाः पञ्च सैनिकाः निमग्नाः (लापताः) अभवन्। अस्यां जलौघे सेनायाः द्वौ अस्थायी-शिविरौ अपि प्रवाहीतौ।अपरतश्च, राज्यस्य अपर-सुबनसिरीमण्डले मार्गनिर्माणस्थले जातेन भीषमभूस्खलनेन चत्वारः जनाः कालकवलिताः (मृताः) जाताः।निमग्नानां सैनिकानाम् अन्वेषणाय रक्षणकार्याय च 'आईटीबीपी' इत्यस्य ५८ तमा वाहिनी, जनरल-रिजर्व-इन्जीनियर-फोर्स (GREF) इत्यस्य ६२ तमी आरसीसी-दलम्, अरुणाचलप्रदेश-आरक्षकाः, स्थानीय-स्वयंसेवकाश्च घटनास्थले नियोजिताः सन्ति। आपत्कालीन-राहत-अन्वेषण-अभियानं तीव्रगत्या प्रचलति।

# यदा धर्मशाला-कारागारे बन्दीकृताः लाला-लाजपतराय-महोदयेन सह हिमाचलस्य २५ स्वातन्त्र्य-सेनानिनः







**हिमसंस्कृतवार्ता — धर्मशाला।**

लाला-लाजपतराय-महोदयेन सह वीरभूमेः हिमाचलप्रदेशस्य २५ क्रान्तिकारिभिः भारतस्य स्वातन्त्र्य-प्राप्तये ज्वालायाः प्रज्वालने महत्त्वपूर्णा भूमिका निर्व्यूढा आसीत्। एतत्कारणात् ब्रिटिश-शासनेन धौलाधार-पर्वतमालायाः समीपे १९१३ तमे वर्षे निर्मिते धर्मशाला-उपकारागारे (Sub-Jail) देशस्य क्रान्तिकारिणः सेनानिनः पृथक्कृत्य कारागारे बन्दीकृत्य रक्षिताः, यत्र समग्र-देशस्य नवभिः स्वातन्त्र्य-सेनानिभिः सह वीरभूमेः काङ्गड़ा, ज्वालामुखी, पालमपुरं, शाहपुरं, सुजानपुर-सहित-अनेकेषां क्षेत्राणां क्रान्तिकारि-योद्धारः अपि आङ्ग्ल-शासनेन कारागार-भित्तीनाम् अन्तः बन्दीकृताः आसन्। अद्यापि 'लाला-लाजपतराय-मण्डल-एवं-मुक्त-सुधारगृहम्, धर्मशाला'-इत्यत्र देशस्य नव-सेनानिनां नामानि ताम्र-पट्टिकायाम् अङ्कितानि सन्ति, तथैव कारागारे स्थितानां हिमाचलस्य २५ क्रान्तिकारिणाम् अपि नामानि पृथक् रूपेण अङ्कितानि वर्तन्ते। अद्य भारतम् स्वातन्त्र्यस्य अशीतितमं (80th) स्वातन्त्र्य-दिवसम् आचरितवान्।

आङ्ग्लानां द्विशत-वर्षाणां पारतन्त्र्यस्य शृङ्खलां भङ्क्त्वा भारतेन स्वातन्त्र्यं सम्प्राप्तम्, यस्मिन् देशस्य सहस्रशः स्वातन्त्र्य-सेनानिभिः स्व-प्राणानाम् आहुतिः दत्ता, लक्षशः सेनानिनश्च स्वातन्त्र्य-प्राप्तये ब्रिटिश-शासनस्य अमानुषिक-अत्याचारान् सहमानाः भारतस्य स्वाधीनता-सङ्ग्रामम् अविरतं प्राचालयन्। अस्यामेव शृङ्खलायां भारतस्य नव-स्वातन्त्र्य-सेनानिभिः सह हिमाचलस्य क्रान्तिकारिभिः पर्वतीय-क्षेत्रे स्वातन्त्र्य-दीपकं प्रज्वाल्य आङ्ग्लानां नासिकायां दमं कृत्वा (प्रपीड्य) तान् इतः निष्कासयितुं महत् योगदानं दत्तम्। अस्मिन् सन्दर्भे शतशः नामानि वीरभूमि-हिमाचलेन सह अपि सम्बद्धानि सन्ति। मण्डल-कारागारे धर्मशालायां स्वातन्त्र्य-सङ्ग्रामे क्रान्तिकारि-रूपेण कारावास-दण्डं भुक्तवतां सेनानिनां नामानि अद्यापि अङ्कितानि सन्ति।समग्र-देशे प्रवृत्तस्य स्वातन्त्र्य-सङ्ग्राम-सङ्घर्षस्य मध्ये पर्वतीय-क्षेत्रस्य हिमाचलस्य अनेकेषु भागेषु अपि आङ्ग्लान् देशान् निष्कासयितुं व्यापक-स्तरे अहिंसया सहैव आन्दोलनात्मकाः उपायाः कृताः। येन आङ्ग्ल-शासनेन स्वातन्त्र्य-सेनानिनां स्वरं दमयितुं ते धर्मशाला-उपकारागारे पृथक्-पृथक् बन्दीकृत्य स्थापिताः। यत्र लाला-लाजपतराय-महोदयम् अपि आन्दोलनात् दूरं स्थापयितुम् एकान्ते कारागारे रक्षितम् आसीत्। अपरपक्षे 'लाला-लाजपतराय-मण्डल-एवं-मुक्त-सुधारगृहम्, धर्मशाला'-इत्यस्य कारागार-अधीक्षकः विकासभटनागरः न्यवेदयत् यत् १९१३ तमे वर्षे ब्रिटिश-काले उपकारागारः निर्मितः आसीत्। ततः परं स्वातन्त्र्य-सेनानिनः पृथक्कृत्य धर्मशाला-कारागारे स्थाप्यन्ते स्म। अस्मिन् लाला-लाजपतराय-सहिताः अनेके स्वातन्त्र्य-सेनानिनः धर्मशाला-कारागारे बन्दिनः अभवन्। लाला-लाजपतराय-महोदयस्य आसन्दः (Chair) प्रकोष्ठा च अद्यापि तथैव सुरक्षिता स्तः। तेन उक्तं यत् नव-सेनानिनां नामानि ताम्र-पट्टिकायाम् अन्येषां च नामानि अपि अद्यापि कारागारे अङ्कितानि सन्ति, ये देशस्य स्वातन्त्र्याय बन्दिनः अभवन्।

### भारतस्य एते क्रान्तिकारिणः पृथक्तया बन्दीकृताः आसन्

लाहौर-नगरस्य (वर्तमान-पाकिस्ताने) लाला-लाजपतरायः (२१ अप्रैल, १९२२ तः ९ जनवरी, १९२३ पर्यन्तम्), लुधियाना-नगरस्य मौलवी हबीबुर्रहमानः (१९२२ तथा १९४२-४५), काङ्गड़ा-मण्डलस्य बस्सीरामः (१९२२), काङ्गड़ा-मण्डलस्य एव सरलामित्रः (१९२२), धर्मशालायाः पञ्चमचन्द्रः (१९२२), लाहौरस्य एस. सार्दुलसिंह-कावेश्रः (१९४३-४६ तथा १९४६), लाहौरस्य युद्धवीरः (१९४३ तः ४४ पर्यन्तम्), जालन्धरस्य मास्टर-काबुलसिंहः (१९४५) तथा लाहौरस्य मियां-इफ्तिखारुद्दीनः (१९४७) च एतेषु प्रमुखाः सन्ति।

### हिमाचलस्य एते क्रान्तिकारिणः कारागारे स्थिताः आसन्

धर्मशालायाः पञ्चमचन्द-कटोचः (१९२२-२३) विहाय अन्ये सर्वे १९४१-४२ तथा १९४३ समये कारागारे बन्दीकृताः। येषु धर्मशालायाः एव बहादुरसिंहः, मनोहरलालः, सुजानपुर-तः ज्ञानचन्दः, तुबी, रूपालसिंहः, ज्वालामुखी-तः गुरदित्ता, गसीटू, शरतू, शिङ्कू, भङ्गाली, ज्वारी, ब्रह्मू, प्रभुः, मङ्गतू, छुछुरू, पालमपुरस्य शम्भुः, काङ्गड़ा-तः प्रीतमसिंहः, जामिनमोहम्मदः (१९३३), ठाकुर-दभजू, नूरपुरस्य रत्नचन्दः, रामचन्दः, शाहपुरस्य गुलाममोहम्मदः तथा हरिपुरस्य शाकरः (१९३३-३४) इत्यादयः क्रान्तिकारिणः सम्मेलिताः सन्ति।

# 'व्यवस्थापरिवर्तनात् स्वावलम्बनं प्रति हिमाचलम्', स्वतन्त्रतादिवसे मुख्यमन्त्रिणः राज्यस्तरीय- सम्बोधनम्, अनेकासां जनकल्याण- योजनानाम् उद्घोषणम्






## ❑विद्यालयेषु १७ दिनाङ्के भविष्यति १५ अगस्त- अवकाशः

**हिमसंस्कृतवार्ताः- हमीरपुरम् ।** राजकीय- वरिष्ठ- माध्यमिक- पाठशाला- बड़सर- मध्ये आयोजिते हिमाचलप्रदेशस्य राज्यस्तरीय- स्वतन्त्रतादिवससमारोहे मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन कर्मचारिणां तथा च अन्यवर्गाणां कृते महत्यः घोषणाः कृताः। मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारस्य आयव्ययक- प्रतिबद्धतायाः अनुसारेण 'एन.एच.एम.' हिमाचलप्रदेशस्य अन्तर्गतं कार्यरतानां प्रायः ९००० 'आशा'-कार्यकर्त्रीणां कृते दीयमानं मासिक- प्रोत्साहनधनं ५८०० रूप्यकेभ्यः वर्धयित्वा ६८०० रूप्यकाणि करिष्यते। तेन एतस्याः वृद्धेः प्रवर्तनाय घोषणा कृता। तेन उद्घोषितं यत् 'एन.एच.एम.'- हिमाचलप्रदेशस्य अन्तः कार्यरताः ते कर्मचारिणः, यैः स्व-वेतनस्य युक्तीकरणात् परं सप्तवर्षाणां सेवा पूर्णा कृता, तेभ्यः १ अप्रैल २०२६ दिनाङ्कात् संशोधितं वेतनं दास्यते। एतदतिरिच्य सर्वकारस्य आय-व्ययक- प्रतिबद्धतां पूरयन् तेन 'एन.एच.एम.' हिमाचल- अन्तर्गतं कार्यरतानां बाह्यस्रोत-कर्मचारिणां परिचारिकाणां, भेषजज्ञानां, शल्यक्रियाकक्ष- सहायकानां प्रयोगशालातन्त्रज्ञानां च कृते प्रतिमासं २५००० रूप्यकाणि, 'डाटा-एंट्री ऑपरेटर' कर्मचारिणां कृते प्रतिमासं १८००० रूप्यकाणि संशोधितपारिश्रमिकस्य घोषणा कृता। एतत् संशोधितं पारिश्रमिकं १ सितम्बर २०२६ दिनाङ्कात् प्रभावी भविष्यति।

## मुख्यमन्त्रिणः स्वपृष्ठभागे स्वाक्षरं ग्रहीतुं बालकानां हठः

बड़सरमध्ये आयोजिते अशीतितमे राज्यस्तरीय- स्वतन्त्रतादिवससमारोहस्य समापने विद्यालयीयछात्रेषु मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य स्वाक्षरं ग्रहीतुं स्पर्धा दृष्टा। बालकानां हठः विचित्रः आसीत्, ते मुख्यमन्त्रिणः स्व-युतकस्य पृष्ठभागे एव स्वाक्षरम् ऐच्छन्। पूर्वं तु मुख्यमन्त्रिणा एतत् उक्त्वा अस्वीकृतं यत् युतकस्य पृष्ठभागे स्वाक्षर-प्रदानेन भवतां मातापितरौ क्रुद्धौ भविष्यतः। किन्तु, यदा बालकाः न अमन्यन्त, तदा मुख्यमन्त्रिणा पृष्ठभागे स्वाक्षराणि प्रदत्तानि।

## विविधविभागेषु सहस्रशः पदानां पूरणस्य उद्घोषणम्

मुख्यमन्त्रिणा जलशक्तिविभागे विविधश्रेणीनां ४००० पदानां पूरणस्य अपि घोषणा कृता। तेन प्रोक्तं यत् सर्वकारीयकर्मचारिभिः निवृत्तवेतनधारिभिश्च प्रदेशस्य विकासे अमूल्यं योगदानं दत्तम् अस्ति, अस्माकं सर्वकारश्च तेषां हितानां रक्षणाय प्रतिबद्धः वर्तते। तेन उक्तं यत् अस्माकं सर्वकारः 'मल्टी-टास्क-वर्कर्स' तथा च बाह्यस्रोत-कर्मचारिणां चिन्तानां प्रति संवेदनशीलः अस्ति। वयं तेषां विषयाणां सर्वान् पक्षान् गम्भीरतया विचारयामः तेभ्यश्च उचितं लाभं दातुं नीतेः निर्माणाय विचारं कुर्मः। मुख्यमन्त्रिणा वनमित्राणां मानदेयं १२,००० रूप्यकाणि कर्तुं घोषणा कृता। तेन सर्वेषु पञ्चायतेषु 'मल्टी- टास्क- वर्कर्स' इत्येषां ४००, शिक्षाविभागे 'कनिष्ठ- सहायकपुस्तकालयस्य' २००, जिलापरिषदः अधीनेषु पञ्चायतेषु 'कार्यप्रशिक्षु- प्राविधिक-सहायकस्य' २८० पदानां पूरणस्य अपि उद्घोषणा कृता। साकमेव १९७५ वरिष्ठ- माध्यमिक- विद्यालयेषु एकैकस्य द्वारपालस्य (चौकीदार) एकैकस्य 'मल्टी-टास्क-वर्कर' कर्मचारिणः च चतुर्सहस्रपदानि पूरयितुं प्रोक्तम्।

## कर्मचारिभ्यः निवृत्तवेतन- धारिभ्यश्च महती घोषणा

मुख्यमन्त्रिणा उक्तं यत् वर्त्तमान-सर्वकारस्य सत्तायां प्रापनात् पूर्वं पूर्वतनसर्वकारः वेतन- निवृत्तवेतन- अवशिष्टांशरूपेण १० सहस्र-कोटि-रूप्यकेभ्यः अधिकां देयतां त्यक्त्वा गतः आसीत्। सर्वकारः सर्वदा कर्मचारिणां निवृत्तवेतनधारिणां च हितैषी अस्ति। प्रदेशस्य कठिनाम आर्थिक-स्थितिम् अपि विगणय्य अधुना यावत् प्रायः २१७० कोटि- रूप्यकेभ्यः अधिकं वेतन- निवृत्तवेतन- अवशिष्टधनं प्रदत्तम् अस्ति। मुख्यमन्त्रिणा उद्घोषितं यत् चतुर्थ-श्रेणी-कर्मचारिभ्यः अस्मिन्नेव मासे वेतन-अवशिष्टांशरूपेण अतिरिक्तं २०,००० रूप्यकाणां भुक्तिषः करिष्यते। तेन एतदपि घोषितं यत् २०१६ तः २०२१ वर्षाणां मध्ये निवृत्तानां तृतीयश्रेण्याः निवृत्तवेतनधारिणां पारिवारिक- निवृत्तवेतनधारिणां च कृते अस्मिन्नेव मासे तेषां अवशिष्टराशेः अतिरिक्तं ३५ प्रतिशतं भुक्तिः करिष्यते। एवमेव प्रथम-द्वितीय-श्रेण्याः निवृत्तवेतनधारिभ्यः पारिवारिक- निवृत्तवेतनधारिभ्यश्च अपि अस्मिन्नेव मासे तेषां अवशिष्टराशेः १५ प्रतिशतं भुक्तिः करिष्यते। तेन उक्तं यत् एतेषु संवितरणेषु सर्वकारः २८१ कोटि- रूप्यकाणि व्ययीकरिष्यति।

## 'इन्दिरागाँधी- मातृ-शिशु- सङ्कल्पयोजना' प्रायोगिक- आधारेण प्रारप्स्यते

मुख्यमन्त्रिणा प्रोक्तं यत् भारतसर्वकारस्य पक्षतः सम्प्रति प्रसारितायां 'राष्ट्रिय- परिवार- स्वास्थ्य- सर्वेक्षणस्य' वार्तायां वर्त्तमान-राज्यसर्वकारस्य काले हिमाचलप्रदेशे महिलानां बालकानां च स्वास्थ्ये परिष्कारः रेखाङ्कितः। तेन उक्तं यत् यद्यपि राज्ये महत्त्वपूर्णा प्रगतिः जाता, किन्तु इतोऽपि परिष्कारस्य आवश्यकता अस्ति। एतेनैव उद्देश्येन राज्यसर्वकारेण मातृभ्यः बालकेभ्यश्च श्रेष्ठं तथा च अधिक-पौष्टिकम् अन्नम् उपलब्धं कारयितुम् 'इन्दिरागाँधी- मातृ-शिशु- सङ्कल्पयोजनां' प्रारब्धुं निर्णयः गृहीतः। सुक्खू- महोदयेन उक्तं यत् राज्यसर्वकारः अधुना एतां योजनां प्रवर्त्तयितुं सज्जः अस्ति अस्याश्च प्रायोगिक-चरणं २ अक्तूबर- दिनाङ्कात् प्रदेशस्य विविधानां मण्डलानां २१ 'आई.सी.डी.एस.' खण्डेषु प्रारप्स्यते। षण्णां मासानाम् अनन्तरं प्रायोगिक-चरणस्य समीक्षा करिष्यते तस्य परिणामानाम् आधारेण च योजना सम्पूर्णे हिमाचलप्रदेशे प्रवर्तिष्यते। तेन उक्तं यत् योजनायाः अन्तः मातृभ्यः, महिलाभ्यः तथा च ६ मासेभ्यः ३ वर्षं यावत् वयसः बालकेभ्यः सम्प्रति दीयमानं पोषणसाहाय्यम् इतोऽपि सुदृढं करिष्यते। वर्त्तमाने दीयमानाः तण्डुलाः, द्विदलानि (दालें), तैलम्, पिष्टकखाद्यम्, पिष्टकम् (पंजीरी), दुग्धचूर्णं च अधिक- पौष्टिक- स्वच्छरीत्या संवेष्टितेभ्यः 'प्रीमिक्स' खाद्यपदार्थेभ्यः श्रेष्ठतरं विधास्यते। एतदतिरिच्य लाभांशिनाम् इच्छानुसारं सप्ताहे त्रिवारं दुग्धम् अण्डानि वा उपलब्धं कारयिष्यन्ते। ३ तः ६ वर्षं यावत् वयसः बालकेभ्यः दीयमानं तप्त- पक्वभोजनम् अपि पोषणगुणवत्तां वर्धयितुं श्रेष्ठतरं करिष्यते। मुख्यमन्त्रिणा उक्तं यत् योजनायां पारदर्शकतां गुणवत्तां च निश्चेतुं सम्पूर्ण- क्रयण- प्रक्रियायाः दायित्वं मण्डलस्तरे 'आई.सी.डी.एस.' खण्डस्तरे च समर्पयिष्यते। अनेन स्थानीयस्तरे पारदर्शिकं क्रयणं निश्चितं भविष्यति मातृणां बालकानां च कृते स्वच्छ- नूतन- गुणवत्तापूर्ण- खाद्यसामग्र्याः उपलब्धता निश्चिता भविष्यति। तेन उक्तं यत् योजनायाः उद्देश्यं मूल-स्तरे पोषणसाहाय्यं सुदृढं विधातुं सम्पूर्ण- हिमाचलप्रदेशे महिलानां बालकानां च स्वास्थ्य- पोषण-सम्बद्धान् श्रेष्ठ-परिणामान् निश्चेतुम् अस्ति।

## १०० नूतनाः 'सीबीएसई' विद्यालयाः उद्घाटयिस्यन्ते, निवृत्ताः चिकित्सकाः २०२७ पर्यन्तं सेवां दास्यन्ति

तेन आगामि-शैक्षणिक-सत्रात् सम्पूर्ण-प्रदेशे १०० नूतनानां 'सीबीएसई'-विद्यालयानाम् उद्घाटनस्य अपि घोषणा कृता। तेन उद्घोषितं यत् अस्मात् मासात् आरभ्य ३१ मार्च २०२७ यावत् निवृत्ताः चिकित्सकाः सेवायां स्थास्यन्ति ते च ३१ मार्च २०२७ दिनाङ्के निवृत्ताः भविष्यन्ति। मुख्यमन्त्रिणा सुक्खू-महोदयेन उद्घोषितं यत् अग्रिमे काले १०० पञ्चायत-क्षेत्राणि हरित-पञ्चायतक्षेत्रानि करिष्यन्ते। मुख्यमन्त्रिणा प्रोक्तं यत् अस्माकं सर्वकारेण सर्वकारीय-क्षेत्रे सहस्रशः युवकेभ्यः जीविका प्रदत्ता। काङ्ग्रेससर्वकारस्य काले कस्यामपि नियुक्तिपरीक्षायां प्रश्नपत्रं न त्रुटितम्। अस्य विपरीते पूर्वतन- भाजपासर्वकारस्य काले आरक्षक-नियुक्ति- परीक्षायाः प्रश्नपत्रं बहिरागतम् कर्मचारी-चयन- आयोगे आयोजितासु नियुक्तिषु च बृहत्-प्रमाणेन अनियिमितताः प्राप्ताः, अपि च प्रश्नपत्राणि विक्रीयन्ते स्म। अस्माकं सर्वकारेण युवानः प्रति विश्वासघातं कृतवतां जनानां विरुद्धं कठोरा कार्याचरणा कृता तादृशेषु दुष्कर्मसु संलग्नाः जनाः कारागारं प्रेषिताः।

### सप्तसु मण्डलेषु दुग्ध-प्रसंस्करण-संरचनायां द्वयोः वर्षयोः १५० कोटि-रूप्यकाणि व्ययीभविष्यन्ति

तेन उक्तं यत् काङ्गड़ा-मण्डलस्य ढगवार-मध्ये प्रायः २५० कोटि-रूप्यकाणां व्ययेन प्रतिदिनं १.५ लक्ष-सेटक-क्षमतायुक्तं प्रदेशस्य प्रथमम् अत्याधुनिकं दुग्ध-प्रसंस्करण-संयन्त्रं स्थाप्यमानम् अस्ति अस्य च कार्यम् अस्मिन्नेव वर्षे पूर्णं भविष्यति। काङ्गड़ा, ऊना, चम्बा तथा च हमीरपुर- मण्डलानां सहस्रशः कृषकेभ्यः अस्याः सुविधायाः साक्षात् लाभः लप्स्यते। तेन उद्घोषितं यत् आगामिषु द्वयोः वर्षयोः राज्यसर्वकारः सोलनं, ऊना, सिरमौरः, शिमला, मण्डी, कुल्लू तथा च हमीरपुर-मण्डलेषु दुग्ध-प्रसंस्करण-संरचनायाम् १५० कोटि-रूप्यकाणि व्ययीकरिष्यति। अनेन 'डेयरी' क्षेत्रम् इतोऽपि सुदृढं भविष्यति कृषकेभ्यश्च श्रेष्ठाः अवसराः सृष्टाः भविष्यन्ति।

### समर्पिता उद्यानपालन-नीतिः प्रवर्तिष्यते: मुख्यमन्त्री

मुख्यमन्त्रिणा उक्तं यत् कृषकाणां समृद्धिं निश्चितं कर्तुं सहैव राज्यसर्वकारः उद्यानपालकानाम् आर्थिकस्थितिं विकसितुम् अपि समान-रूपेण कटिबद्धः अस्ति। हिमाचलप्रदेशः देशस्य प्रथमं राज्यं भवितुं गच्छति, यत् एकाम् समर्पिताम् उद्यानपालन- नीतिं प्रवर्त्तयिष्यति। अनेन प्रायः ८२,२०० जनेभ्यः जीविकायाः अवसराः सृष्टाः भवेयुः इति आशा अस्ति। तेन उक्तं यत् सेब-फलानां संवेष्टनाय सार्वभौमिक-सम्पुटकस्य अनिवार्यतां कृत्वा सहस्रशः उद्यानपालकेभ्यः पूर्वमेव लाभः प्राप्तुम् आरब्धः। अनेन तेषाम् उत्पादानां श्रेष्ठानि मूल्यानि निश्चितानि जातानि विपण्यां च तेषाम् शोषणे नियन्त्रणं कर्तुं साहाय्यं प्राप्तम्।

## २ अक्तूबर-दिनाङ्कात् 'अपना परिवार सुखी परिवार'-इति योजना प्रारप्स्यते

मुख्यमन्त्रिणा सुक्खू-महोदयेन उक्तं यत् जनैः सह वार्तालापस्य समये तेन तादृशानाम् आर्थिक- दुर्बल-परिवाराणां विषये ज्ञातम्, येषां नामानि 'बी.पी.एल.' सूच्यां न आसन्। तादृशानां परिवाराणाम् उचितं परिचयं निश्चेतुं राज्यसर्वकारेण गते एकस्मिन् वर्षे अष्टसु चरणेषु सर्वेक्षणं कारितम्। प्रदेशस्य प्रायः १९ लक्ष-परिवारेषु १.८० लक्ष-परिवाराणां परिचयः तादृश-परिवार-रूपेण जातः, येभ्यः सर्वकारात् अधिकस्य साहाय्यस्य ध्यानस्य च आवश्यकता वर्तते। मुख्यमन्त्रिणा प्रोक्तं यत् एतेषां परिवाराणां चयनम् उपायुक्तानां माध्यमेन कृतम् अस्ति तेषां पक्षतः अन्तिमाः सूच्यः अपि ज्ञापिताः सन्ति। एतेभ्यः परिवारेभ्यः राज्यसर्वकारः २ अक्तूबर-दिनाङ्कात् 'अपना परिवार सुखी परिवार'-इतिज्ञयोजनां प्रारप्स्यते। अस्याः अन्तः आगामिषु द्वयोः वर्षयोः एतेषां परिवाराणाम् आर्थिकस्थितिं परिष्कर्तुम् एका व्यवस्था स्थापयिष्यते। तेन उक्तं यत् सर्वेभ्यः उपायुक्तेभ्यः निर्देशाः दत्ताः यत् आगामि-द्वयोः मासयोः अभ्यन्तरे योजनायाः अन्तर्गतानां प्रत्येक- परिवाराणाम् आवश्यकतानां मूल्याङ्कनं क्रियेत। अनेन प्रत्येकपरिवाराय आवश्यकीनां विशेषसाहाय्यानां परिचये साहाय्यं लप्स्यते। केन्द्रस्य राज्यसर्वकारस्य च विविधाः योजनाः एतान् परिवारान् लक्षीकृत्य करिष्यन्ते येन ते उपलब्धानाम् अवसराणां कल्याणकारिणीनां योजनानां च पूर्णं लाभं प्राप्तुं शक्नुयुः। तेन स्पष्टीकृतं यत् एतेषु अर्धाधिकाः परिवाराः पूर्वमेव 'बी.पी.एल.' सूच्यां सम्मिलिताः सन्ति, यदा च केचन परिवाराः सम्प्रति अस्याः अन्तः न आगच्छन्ति।

### 'बी.पी.एल.' सूची यथा वर्तते तथैव स्थास्यति- मुख्यमन्त्री

तेन आश्वासनं दत्तं यत् राज्यसर्वकारः 'बी.पी.एल.' परिवारेभ्यः दीयमानं कमपि लाभं न तु न्यूनीकरिष्यति न च प्रतिनिवर्तयिष्यति। मुख्यमन्त्रिणा उक्तं यत् केचन विपक्ष-नेतारः एतां भ्रामिकां वार्तां प्रसारयन्ति यत् सर्वकारः 'बी.पी.एल.' परिवाराणां सङ्ख्यां न्यूनीकर्तुम् इच्छति। तेन उक्तं यत् एते आरोपाः सर्वथा असत्याः निराधाराश्च सन्ति। 'बी.पी.एल.'-सूची यथा अस्ति तथैव स्थास्यति एतेभ्यः परिवारेभ्यः दीयमानाः सर्वे वर्त्तमानलाभाः निरन्तरं स्थास्यन्ति। मुख्यमन्त्रिणा प्रोक्तं यत् तेषां सर्वकारेण प्रथमवारं राज्यस्य आर्थिकसंसाधनानां सुदृढीकरणाय व्यवस्थिता दृष्टिः स्वीकृता हिमाचलप्रदेशं च आर्थिकदृष्ट्या स्वावलम्बिनं कर्तुं दिशि निर्णयात्मकानि पदानि गृहीतानि।

## 'राज्यम् अधुना निरन्तरं वित्तीय-स्वावलम्बनस्य दिशि अग्रे सरति'

मुख्यमन्त्रिणा उक्तं यत् षोडशेन वित्त-आयोगेन प्रायः ८,००० तः १०,००० कोटि-रूप्यकाणां राजस्व-हानि- अनुदानं (RDG) स्थगितम्, यत् राज्यम् १९५२ वर्षात् संविधानस्य २७५(१) अनुच्छेदस्य अन्तर्गतं प्राप्नोति स्म। अनेन निर्णयेन राज्यस्य गम्भीरे आर्थिक-सङ्कटे गमनस्य आशङ्का प्रकटीकृता आसीत्। तथापि, हिमाचलप्रदेशः अस्याः कठिनायाः स्थितेः सफलतापूर्वकं बहिरागतवान्। तेन उक्तं यत् अस्माकं निरन्तरप्रयासैः राज्यम् अधुना निरन्तरं वित्तीय-स्वावलम्बनस्य दिशि अग्रे सरति। सुक्खु-महोदयेन उक्तं यत् राज्यसर्वकारः भाखड़ा- परियोजना- सम्बद्धं प्रायः ७००० कोटिरूप्यकाणां स्वाधिकारं दृढतया सत्यनिष्ठतया च अग्रे नयति। एवमेव शानन, बैरास्यूल, जल-उपकर, चण्डीगढ-सम्बद्धेषु विषयेषु हिमाचलस्य वैधानिक-अधिकाराणां सुरक्षणाय प्रयासाः निरन्तरं प्रचलन्ति।

### 'चिट्टा'-मुक्त-हिमाचल-अभियानस्य द्वितीयं चरणम् ऊनातः प्रारप्स्यते

मुख्यमन्त्रिणा उक्तं यत् जनानां सक्रिय-सहयोगेन समर्थनेन च अस्माकं सर्वकारेण 'चिट्टा- मुक्त-हिमाचल- अभियानम्' आरब्धम्। अभियानस्य द्वितीयं चरणं ७ सितम्बर २०२६ दिनाङ्कात् ऊनातः प्रारप्स्यते। शीघ्रमेव 'खेलो हिमाचल, चिट्टा-मुक्त अभियानम्' अपि प्रारप्स्यते, यस्य माध्यमेन युनः क्रीडाभिः सह योजयितुं स्वस्थ-उत्पादक- जीवनशैलीं स्वीकर्तुं च प्रोत्साहयिष्यन्ते। तेन उक्तं यत् नशा-तस्कर-जालं नाशयितुं हिमाचलप्रदेशं च नशामुक्तं राज्यं रचयितुं कठोराः निर्णयाः गृह्यमाणाः सन्ति।

## सर्वेषु विधानसभा-क्षेत्रेषु स्वच्छ-जलाय प्रवर्त्यते २००० कोटि-रूप्यकाणां योजना - सुक्खू

सुक्खू-महोदयेन उक्तं यत् राज्यसर्वकारः प्रत्येक-नागरिकाय स्वच्छं सुरक्षितं च पेयं जलम् उपलब्धं कारयितुं कार्यं करोति। सर्वेषु विधानसभा-क्षेत्रेषु स्वच्छजलस्य उपलब्धतां निश्चेतुं २००० कोटि-रूप्यकाणां व्यापिका योजना प्रवर्त्यते। साकमेव वर्त्तमान-जल-संरचनां सुदृढां पुनर्निर्मितां च कर्तुं भू-जल-पुनर्भरणं प्रोत्साहयितुं च अनेके उपायाः क्रियमाणाः सन्ति। एतैः उपायैः जलस्य उपलब्धतायां गुणवत्तायां च परिष्कारः भविष्यति राज्यस्य च समग्रा जल-सुरक्षा सुदृढा भविष्यति। तेन उक्तं यत् धार्मिक-पर्यटनस्य विकासाय मण्डीमण्डले माता-बगलामुखी 'रोपवे'-यानं जनतायै समर्पितम्। चिन्तपूर्णीमन्दिरे बाबा- बालकनाथ- मन्दिरे चापि 'रोपवे'-निर्माणं करिष्यते, मण्डी-मध्ये च शिवधामस्य कार्यं पूर्वमेव आरब्धम्। मुख्यमन्त्रिणा प्रोक्तं यत् राज्यस्य इतिहासे प्रथमवारं सर्वकारीय-विद्यालयानां छात्राः शैक्षणिक-भ्रमणाय विदेशं प्रेषिताः।

### स्वास्थ्य-सेवायां परिष्कारः सर्वकारस्य सर्वोच्च-प्राथमिकतासु सम्मिलितः- मुख्यमन्त्री

तेन उक्तं यत् शिक्षया सह स्वास्थ्य-सेवायां परिष्कारः अपि राज्यसर्वकारस्य सर्वोच्च- प्राथमिकतासु सम्मिलितः अस्ति। रुग्णेभ्यः विशेषज्ञ- स्वास्थ्यसेवाः आधुनिक- चिकित्सा- उपकरणानि च उपलब्धं कारयितुम् ऐतिहासिकाः उपायाः कृताः। तेन प्रोक्तं यत् हिमाचले प्रथमवारं सर्वेषु चिकित्सा-महाविद्यालयेषु चमियाणा- चिकित्सालयेन सह 'रोबोटिक-शल्यक्रियायाः' सुविधा आरब्धा। मुख्यमन्त्रिणा उक्तं यत् अस्याः सुविधायाः प्रदेशस्य जनेभ्यः राज्यस्य अन्तः एव उन्नता चिकित्सा-प्रौद्योगिकी उपलब्धा भवितुं शक्ष्यति। तेन प्रोक्तं यत् वैयक्तिक-चिकित्सालयेषु 'रोबोटिक-शल्यक्रियायाः' व्ययः सामान्यतः ५ लक्षरूप्यकेभ्यः अधिकः भवति, यदा च राज्यसर्वकारः सर्वकारीयसंस्थासु एतां सुविधां ३०,००० रूप्यकेभ्यः ८०,००० रूप्यकाणां व्ययेन उपलब्धं कारयति। अनेन सामान्य-जनेभ्यः उन्नतः उपचारः सुलभः भविष्यति।

## प्रथमवारं लक्षशः छात्राः साक्षात् अश्रृण्वन् मुख्यमन्त्रिणः सम्बोधनम्

तत्रैव हिमाचले स्वतन्त्रता-दिवसः प्रथमवारं सर्वकारीय- विद्यालयेभ्यः बहुभिः कारणैः विशिष्टः अभवत्। प्रदेशस्य सर्वकारीय-विद्यालयेषु प्रथमवारं मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य राज्य-स्तरीय- सम्बोधनस्य प्रत्यक्ष-प्रसारणं कृतम्, यत् लक्षशः छात्राः एकत्रैव दृष्टवन्तः श्रुतवन्तश्च। छात्राः स्वतन्त्रता-दिवस-समारोहस्य, मुख्यातिथेः सन्देशस्य, स्वतन्त्रता-सङ्ग्रामस्य इतिहासस्य देशस्य महान्-राष्ट्रनायकानां योगदानस्य च विषये ज्ञापयिष्यन्ते। षष्ठी-कक्षा-तः द्वादशीकक्षां यावत् छात्राः तेषां सम्बद्धेषु राजकीय- वरिष्ठ- माध्यमिक- विद्यालयेषु समारोहेषु योजिताः। तत्रैव 'कॉम्प्लेक्स'-विद्यालयेषु ५०० मीटर-परिधौ स्थितानां प्राथमिक- विद्यालयानां छात्राः अपि मुख्य-समारोहस्य अङ्गं सञ्जाताः।

### विद्यालयेषु १७ दिनाङ्के भविष्यति १५ अगस्त- अवकाशः

स्वतन्त्रता-दिवसमधिकृत्य शिक्षाविभागस्य पक्षतः प्रसारितानाम् आदेशानां मध्ये अधुना प्रदेशस्य विद्यालयेषु १७ अगस्त-दिनाङ्के अवकाशः भविष्यति। मुख्यमन्त्रिणा स्पष्टीकृतं यत् १५ अगस्तदिनाङ्के आयोजितानां कार्यक्रमाणां कारणेन छात्रेभ्यः शिक्षकेभ्यश्च १७ अगस्त-दिनाङ्के विरामः (अवकाशः) प्रदास्यते।

# पहाड़ीगल्लां



## टोरी दा पत्ता

मैं टोरी दा पत्ता जी अड़यो मैं टोरी दा पत्ता
मैं टोरी दा पत्ता जी अड़यो मैं टोरी दा पत्ता
खरिया सजदा बुरिया भी लगदा मैं टोरी दा पत्ता।
तील्ली-तील्ली जोड़े मिंजो ता मैं पूरा बणदा
मैं टोरी दा पत्ता जी अड़यो मैं टोरी दा पत्ता
पूजा-श्राद्धा, जनमें-मरणे मैं तां अग्गे रैहदा।
चार्ज, बुजरू, पंडता दा कम्म मिंजो बाजी नी चलदा
मैं टोरी दा पत्ता जी अड़यो मैं टोरी दा पत्ता
सैला-सैला ताज़ा पत्तल पैठी बिच है लगदा।
मधरे, दालां, खट्टा पत्तली बिच है संजदा।
मैं टोरी दा पत्ता जी अड़यो मैं टोरी दा पत्ता
मैं तां इक औषधिय पौधा (पत्ता) लाभ ही देंगा कोई
खोंदेया भी ता, बाद खाणे दे नुकसान नी देंगा कोई।
मैं टोरी दा पत्ता जी अड़यो मैं टोरी दा पत्ता
पर कुछ सालां ते हुण मेरी बात न पूछे कोई।
थर्मोकोल प्लेटा, डुनया दी चकाचौंध गई होई।
मैं टोरी दा पत्ता जी अड़यो मैं टोरी दा पत्ता
अर्ज करदा मैं सारयां अग्गे मिंजो लया अपनाई।
पैसे देंगा चार कन्ने पर्यावरण भी देंगा बचाई
मैं टोरी दा पत्ता जी अड़यो मैं टोरी दा पत्ता

**रचनाकार: रविन्द्रा कुमारी**
**पता: गांव व डाक पपरोला**

# स्वातंत्र्यदिवसविशेषः - राष्ट्र-प्रेम्णा पीतं वीरगति-सुधारसम्, हिमाचलस्य १७३८ सैनिकाः राष्ट्राय आत्मार्पणम् अकुर्वन्

**हिमसंस्कृतवार्ता — हमीरपुरम्।**
"ऐ मेरे वतन के लोगो... तुम खूब लगा लो नारा, ये शुभ दिन है हम सब का लहरा लो तिरंगा प्यारा, पर मत भूलो सीमा पर वीरों ने हैं प्राण गंवाए, कुछ याद उन्हें भी कर लो जो लौट के घर न आए........।"
एताः पङ्क्तयः देवभूमेः हिमाचलप्रदेशस्य तेभ्यः सैन्य-वीरेभ्यः समर्पिताः सन्ति, यैः भारतमातुः रक्षणाय स्वकीयानां प्राणानाम् सर्वोच्चं बलिदानं दत्तम्। स्वातन्त्र्यस्य अशीति-वर्षेषु हिमाचलप्रदेशस्य १७३८ सैनिकाः देशाय वीरगतिं प्राप्तवन्तः। एतेषां पराक्रमं राष्ट्र-समर्पणं च सम्पूर्णं जगत् नमस्करोति। हिमाचलप्रदेशे नास्ति तादृशः कोऽपि जनपदः यतः सैनिकैः सेनायां सेवाः न प्रदत्ताः स्युः।

राष्ट्र-रक्षणाय प्राणाहुतिं दत्तवत्सु प्रत्येक-मण्डलात् देशभक्ताः सम्मिलिताः आसन्। यदि मण्डलवारं बलिदानीनाम् अङ्कानाम् उपरि दृष्टिः प्रसार्यते, तर्हि वीरगति-प्राप्तृषु काङ्गड़ा-मण्डलम् अग्रेसरम् अस्ति। काङ्गड़ा-मण्डलस्य ७४३ सैनिकैः विविध-युद्धेषु त्रिवर्ण-ध्वजस्य गौरवम् स्वाभिमानं च स्व-प्राणान् समर्प्य वर्धितम्। स्वातन्त्र्यात् अधुना यावत् अष्टसु दशकेषु दशभ्यः अधिकानि युद्धानि लब्धानि, येषु १७३८ सैनिकाः हुतात्मनः (बलिदानिनः) संजाताः।

एतेषु बिलासपुर-मण्डलस्य १४९, चम्बा-मण्डलस्य ४८, हमीरपुरस्य ३४९, काङ्गड़ा-मण्डलस्य ७४३, कुल्लू-मण्डलस्य १४, लाहुल-स्पीति-तः अष्ट (८), मण्डी-मण्डलस्य १७१, शिमलायाः ३३, किन्नौरस्य षट् (६), सिरमौरस्य ४६, सोलनस्य ३४ तथा च ऊना-मण्डलस्य १३७ वीर-सैनिकाः सम्मिलिताः सन्ति। यदि भारतीय-सेनया लब्धानां युद्धानां वार्ता क्रियते, तर्हि १९४७ तः १९४९ पर्यन्तं पाकिस्तानेन सह सञ्जाते युद्धे हिमाचलप्रदेशस्य १३६ सैनिकाः वीरगतिं प्राप्ताः।

तत्रैव १९६५ तः १९६७ वर्षयोः मध्ये पाकिस्तानेन सह जाते युद्धे हिमाचलस्य ३४४ वीरैः वीरगतिः प्राप्ता। १९७१ तमे वर्षे पाकिस्तानेन सह युद्धे वीरभूमेः २५९ वीराः राष्ट्र-रक्षणाय बलिप्रदानेन स्व-प्राणान् हुतवन्तः। 'ऑपरेशन-मेघदूत' यत् १९८४ तमे वर्षे सियाचिन-हिमनदे (Glacier) पूर्ण-नियन्त्रणं प्राप्तुं भारतीय-सशस्त्र-बलैः सञ्चालितं साहसिकं सैन्य-अभियानम् आसीत्। अस्मिन् काले पाकिस्तानी-सेनया सह सञ्जाते सङ्घर्षे हिमाचलस्य ४९ वीरैः प्राणानां बलिदानं दत्तम्। १९८७ तमे वर्षे सञ्चालिते 'ऑपरेशन-पवन' अभियाने भारतीय-सेनायाः उग्रवादि-सङ्घटनेन सह सङ्घर्षः अभवत्। अस्मिन् सङ्घर्षे प्रदेशस्य ३९ सैनिकाः वीरगतिं प्राप्ताः। यदि 'ऑपरेशन-विजय' इत्यस्य वार्ता क्रियेत, तर्हि अत्रापि बलिदानस्य सङ्ख्या महती आसीत्।




१९९९ तमे वर्षे कारगिल-युद्धाय 'ऑपरेशन-विजय' इति नाम दत्तम् आसीत्। अस्मिन् भारतीय-सेनया कारगिल-पर्वत-शिखरेषु अधिकारं कृतवतः पाकिस्तानी-अनुप्रवेशकारिणः सैनिकांश्च निष्कास्य भारतीय-भूभागः स्व-नियन्त्रणे गृहीतः। अस्मिन् युद्धे हिमाचलप्रदेशस्य ५७ सैनिकैः राष्ट्र-रक्षणाय प्राणाहुतिः दत्ता। १३ सितम्बर २००१ दिनाङ्के भारतीय-संसदि सञ्जातस्य आतङ्कवादि-आक्रमणस्य प्रत्युत्तरे भारतसर्वकारेण 'ऑपरेशन-पराक्रम' इति सैन्य-अभियानं प्रवर्त्तितम् आसीत्। तस्मिन् युद्धे राज्यस्य ७७ वीराः बलिदानं प्राप्तवन्तः। सर्वाधिकं बलिदानम् 'ऑपरेशन-रक्षक' अभियाने अभवत्। 'ऑपरेशन-रक्षक' एकं प्रमुखम् आतङ्कवाद-विरोधि उग्रवाद-विरोधि च अभियानम् आसीत्। एतत् जम्मू-काश्मीरे प्रारब्धम् आसीत्। तस्मिन् काले हिमाचलप्रदेशस्य ३८३ सैनिकाः वीरगतिं गताः। एतेन सहैव अन्येषु अभियानेषु अपि हिमाचलस्य २१० सैनिकैः देश-सीमा-रक्षणे स्वकीयम् आत्मार्पणं कृतम्।

*"स्वातन्त्र्यात् आरभ्य अधुना यावत् अशीति-वर्षेषु हिमाचलप्रदेशात् १७३८ सैनिकाः वीरगतिं प्राप्ताः। प्रत्येक-मण्डलात् सैनिकैः बलिदानं प्राप्तम्। राष्ट्र-रक्षणे समये-समये विविधानि सैन्य-अभियानानि सञ्चालितानि, येषु सेनायाः वीर-सैनिकैः वीरतायाः पराक्रमस्य च प्रमाणं यच्छद्भिः प्राणानां सर्वोच्चं बलिदानं दत्तम्। वयं तान् वीर-सुपुत्रान् शतशः प्रणमामः।"*
**— सेवानिवृत्तः ब्रिगेडियर-मदनशीलशर्मा, निदेशकः भूतपूर्व-सैनिक-कल्याण-निदेशालयः, हमीरपुरम्**

# केन्द्रीयसंस्कृतविश्वविद्यालये लखनऊपरिसरे अशीतितमः स्वातन्त्र्यदिवसः उत्साहेन सम्पन्नः

**हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।**
केन्द्रीय- संस्कृत- विश्वविद्यालयस्य लखनऊपरिसरे अशीतितमः स्वातन्त्र्यदिवसः देशभक्त्या, गौरवेण उत्साहेन च आचरितः। कार्यक्रमस्य अवसरः राष्ट्रध्वजारोहणेन प्रारब्धः। परिसरस्य आदरणीयः प्रो. सर्वनारायण झा महोदयः राष्ट्रध्वजस्य ध्वजारोहणं कृतवान्।ध्वजारोहणानन्तरं उपस्थितैः जनैः देशस्य वीरशहीदानां स्वतन्त्रतासेनानीनां च श्रद्धापूर्वकं स्मरणं कृत्वा तेषां बलिदानाय नमनं कृतम्। कार्यक्रमे विश्वविद्यालयस्य छात्राः, आचार्याः, कर्मचारीगणः तथा परिसरपरिवारस्य अन्ये सदस्याः उत्साहपूर्वकं सहभागितां कृतवन्तः।स्वातन्त्र्यदिवसस्य उपलक्ष्ये परिसरे विविधाः सांस्कृतिककार्यक्रमाः अपि आयोजिताः। छात्रैः देशभक्तिपराः प्रस्तुतयः प्रदर्शिताः। विविधवेशभूषाभिः, राष्ट्रध्वजैः तथा सांस्कृतिकप्रस्तुतिभिः कार्यक्रमस्य वातावरणं देशभक्तिमयं जातम्। अवसरेऽस्मिन् उपस्थितैः राष्ट्रस्य एकताम्, अखण्डतां, सांस्कृतिकवैभवस्य च संरक्षणं सुदृढं कर्तुं संकल्पः कृतः। संस्कृतस्य गौरवशालीपरम्परया सह राष्ट्रभक्तेः समन्वयेन आयोजितः अयं समारोहः विशेषः अभवत्।
जय हिन्द! वन्दे मातरम्!



# जी. डी. गोयनका विद्यालये ८०तमः स्वातन्त्र्यदिवसः आचरितः



*हिमसंस्कृतवार्ताः- कुणालकौशिकः, संस्कृत शिक्षकः, योग शिक्षकः च, मोतिहारी*

15 अगस्त 2026 तमे दिनाङ्के जी. डी. गोयनका पब्लिक विद्यालयः, मोतिहारी इत्यस्मिन् विद्यालये भारतस्य 80तमः स्वातन्त्र्यदिवसः देशभक्त्या राष्ट्रियगौरवेण च सह महता उत्साहेन आचरितः।

कार्यक्रमस्य शुभारम्भः राष्ट्रध्वजस्य तिरङ्गस्य ध्वजारोहणेन राष्ट्रगानेन च अभवत्। स्वतन्त्रतायाः, एकतायाः, आशायाः च प्रतीकरूपेण आकाशे गुब्बारकाणां विमोचनं समारोहस्य विशेषाकर्षणम् आसीत्। विद्यालयस्य प्रधानाचार्यः स्वप्रेरणादायके सम्बोधने स्वतन्त्रतायाः वास्तविकमहत्त्वं तथा कर्तव्यस्य उत्तरदायित्वस्य च महत्त्वं प्रतिपादितवान्। अष्टम्याः कक्षायाः नाज़िश मुस्कान इत्यस्याः छात्रायाः प्रभावशालिना आङ्ग्लभाषणेन तथा नवम्याः कक्षायाः आकर्षशर्मा इत्यस्य प्रभावपूर्णेन हिन्दीभाषणेन कार्यक्रमः समृद्धः अभवत्। शिक्षकैः प्रस्तुतं “मेरा मुल्क मेरा देश” इति देशभक्तिगीतं सर्वान् भावविभोरान् अकरोत्।उपप्रधानाचार्यस्य धन्यवादज्ञापनेन समारोहस्य समापनम् अभवत्। कार्यक्रमेन छात्राः स्वतन्त्रतायाः मूल्यानां संरक्षणाय राष्ट्रनिर्माणे च सक्रिययोगदानाय प्रेरिताः। “बलिदानानां सम्मानः, स्वातन्त्र्यस्य उत्सवः, उज्ज्वलभारतस्य च निर्माणाय प्रेरणा।”

# श्रीसिद्धबली- संस्कृत- विद्यालये उल्लासेन आचरितः ८०तमः स्वातन्त्र्यदिवसः





हिमसंस्कृतवार्ताः- कोटद्वारम्, १५ अगस्त २०२६।

श्रीसिद्धबलीसंस्कृतविद्यालये, कोटद्वारे राष्ट्रभक्त्या सांस्कृतिकोत्साहेन च परिपूर्णे वातावरणे ८०तमः स्वातन्त्र्यदिवसः उल्लासेन आचरितः। कार्यक्रमस्य अध्यक्षता डॉ. जे. पी. ध्यानीमहोदयेन कृता।

कार्यक्रमस्य शुभारम्भः मुख्यातिथिना शिवचरणपोखरियालमहोदयेन, मुख्यवक्त्रा डॉ. चन्द्रमोहनबड़थ्वालमहोदयेन, विद्यालयस्य प्रबन्धकेन डॉ. रमाकान्तकुकरेतीमहोदयेन, गेफ्स-संस्थापकनिदेशकेन रामभरोसाकण्डवालमहोदयेन, मनमोहनकालामहोदयेन, विद्यालयस्य प्रधानाचार्येण अशोकजोशीमहोदयेन संयुक्तरूपेण दीपप्रज्वलनेन कृतः। अस्मिन् अवसरे विद्यालयस्य छात्रैः छात्राभिश्च सरस्वतीवन्दनया सह राष्ट्रभक्तिपरकाणि गीतानि विविधाश्च सांस्कृतिकाः प्रस्तुतयः प्रदर्शिताः। विद्यार्थिभिः प्रस्तुतः ‘राइफल-डान्स’, ‘नमामि वयम्’, ‘कालिदासो जने जने’ इत्यादयः कार्यक्रमाः दर्शकानां महतीं प्रशंसां प्राप्तवन्तः।कार्यक्रमं सम्बोधयन् अध्यक्षः डॉ. जे. पी. ध्यानीमहोदयः अवदत् यत् स्वातन्त्र्यं वयं स्वातन्त्र्यसंग्रामसेनानाम् अथकसंघर्षेण, त्यागेन बलिदानेन च प्राप्तवन्तः। अस्माभिः स्वातन्त्र्यस्य सम्मानं कुर्वद्भिः तस्य रक्षणाय सर्वदा सज्जैः भवितव्यम्। राष्ट्रस्य उन्नत्यै स्वातन्त्र्यस्य च सार्थकतायै समाजस्य सुसंस्कृतत्वं संस्कारसम्पन्नत्वं च अत्यन्तम् आवश्यकम् इति सः प्रतिपादितवान्।

मुख्यवक्ता डॉ. चन्द्रमोहनबड़थ्वाल-महोदयः सारगर्भितेन उद्बोधनेन सह काव्यपाठं कृत्वा विद्यार्थिषु राष्ट्रप्रेमभावनां जागरितवान्। रामभरोसाकण्डवाल-महोदयेन स्वप्रसिद्धया ‘कुत्र गताः ते राष्ट्रनायकाः’ इति कवितया स्वातन्त्र्यसंग्रामसेनानीनां राष्ट्रनायकानां च त्यागं बलिदानं च स्मारयित्वा उपस्थितजनसमुदायः भावविभोरः कृतः। तथैव मनमोहनकालामहोदयेन ‘सनातनसंस्कृतेः वैज्ञानिकं महत्त्वम्’ इति विषये प्रकाशं निक्षिप्य भारतीयसंस्कृतेः वैज्ञानिकाः जीवनोपयोगिन्यश्च परम्पराः विद्यार्थिभ्यः परिचिताः कारिताः।

विद्यालयस्य प्रबन्धकः डॉ. रमाकान्तकुकरेतीमहोदयः सर्वेषां अतिथीनाम्, अभिभावकानां, शिक्षकाणां विद्यार्थिनां च आभारं प्रकटयन् विद्यालयस्य भावियोजनानां विषये सूचनां दत्तवान्। प्रधानाचार्यः अशोकजोशीमहोदयः छात्राणां उत्साहवर्धनं कृत्वा सर्वेभ्यः स्वातन्त्र्यदिवसस्य हार्दिकाः शुभकामनाः प्रदत्तवान्। कार्यक्रमस्य सफलं सञ्चालनम् अतुलडोबरियालमहोदयेन कृतम्। अन्ते कार्यक्रमाध्यक्षः डॉ. जे.पी. ध्यानीमहोदयः विधिवत् कार्यक्रमस्य समापनस्य घोषणां कृत्वा मिष्टान्नवितरणं कारितवान्।

सम्पूर्णः विद्यालयपरिसरः राष्ट्रभक्तेः, संस्कृतेः देशप्रेम्णश्च घोषैः गुंजायमानः अभवत्। अनेन कार्यक्रमेण विद्यार्थिषु राष्ट्रस्य प्रति समर्पणभावः, संस्कारः, गौरवशालिनस्य इतिहासस्य च प्रति सम्मानभावना च अधिकसुदृढा अभवत्।

# डी.पी.एस. बोकारो-विद्यालये ‘विकसितभारत @2047’ इति लक्ष्यं प्रति युवाशक्तेः प्रेरणया 80तमः स्वातन्त्र्यदिवससमारोहः




हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो। दिल्ली पब्लिक स्कूल, बोकारो-विद्यालये भारतस्य 80तमः स्वातन्त्र्यदिवसः महान् उत्साहेन, राष्ट्रभक्त्या च समन्वितेन वातावरणेन आचरितः। अस्य समारोहस्य मुख्यविषयः आसीत्- ‘विकसितभारत@2047 कृते युवाशक्तिः’। समारोहस्य शुभारम्भः सामूहिकराष्ट्रगीतगानेन अभवत्। ततः विद्यालयस्य प्रधानाचार्यः डा. ए. एस. गंगवारः राष्ट्रध्वजम् आरोपितवान्। अनन्तरं छात्रैः शिक्षक-शिक्षिकाभिः च समवेतस्वरेण राष्ट्रगानं गीतम्। गगने गौरवेण विलसता त्रिवर्णध्वजः सम्पूर्णे विद्यालयपरिसरे राष्ट्रभक्तेः, एकतायाः च भावनां प्रसारितवान्। देशभक्तिपूर्णानां गीतानां भावपूर्णाभिः प्रस्तुतिभिः विद्यालयस्य वातावरणं राष्ट्रप्रेम्णा परिपूर्णम् अभवत्। वरिष्ठविभागस्य छात्रपरिषदः सदस्यैः प्राथमिकविभागस्य लघुवयस्कैः छात्रैः च स्वनिर्मितानि अभिनन्दनपत्राणि प्रधानाचार्याय समर्पितानि। तैः स्वातन्त्र्यदिवसस्य पावने अवसरे प्रधानाचार्यस्य प्रति श्रद्धा-सम्मानयोः भावः प्रकटितः। स्वातन्त्र्यदिवसस्य पूर्वसन्ध्यायां विद्यालये विशेषा प्रार्थनासभा आयोजिता। तस्यां छात्रैः देशभक्तिपूर्णाः विविधाः सांस्कृतिकाः प्रस्तुतयः प्रदर्शिताः। एताभिः प्रस्तुतिभिः छात्राणां राष्ट्रस्य प्रति गहनं प्रेम, समर्पणभावना च अभिव्यक्ता। अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्यः डा. ए. एस. गंगवारः 80तमस्य स्वातन्त्र्यदिवसस्य हार्दिकाः शुभकामनाः प्रदत्तवान्। सः भारतस्य स्वातन्त्र्यप्राप्त्यर्थं बलिदानं कृतवद्भ्यः अमरस्वतन्त्रतासेनानीभ्यः श्रद्धाञ्जलिं समर्पितवान्। सः अवदत्- “स्वतन्त्रभारतं अस्माकं स्वातन्त्र्यवीराणां बलिदानस्य अमूल्यं वरदानम् अस्ति। अतः वयं अस्माकं गौरवशालिनं अतीतं स्मृत्वा वर्तमानं सुदृढं कुर्याम, उज्ज्वलभविष्यस्य निर्माणाय च निरन्तरं प्रयत्नं कुर्याम। राष्ट्रनिर्माणे शिक्षकाणां भूमिका अत्यन्तं महत्त्वपूर्णा अस्ति, यतः ते भावीपीढ्याः निर्माणं कुर्वन्ति।” सः प्रत्येकं युवा-भारतीयं प्रति आह्वानं कृतवान् यत् परिवर्तनस्य प्रतीक्षां न कृत्वा सः स्वयमेव तस्य परिवर्तनस्य वाहकः भवेत्, यत् परिवर्तनं सः समाजे राष्ट्रे च द्रष्टुम् इच्छति। सः छात्रान् ‘विकसितभारत@2047 सक्रियतया योगदानं दातुं प्रेरितवान्।

# जय जलाराम आयुर्वेदिक चिकित्सा महाविद्यालये अशीतितमः स्वातन्त्र्यदिवस-समारोहः - २०२६-२७

### • जय जलाराम आयुर्वेदिक चिकित्सा महाविद्यालयः तथा प्रेरणा नर्सिङ् संस्थानम्

जय जलाराम आयुर्वेदिक चिकित्सा महाविद्यालये तथा प्रेरणा नर्सिङ् संस्थाने १५ अगस्त २०२६ तमे दिने अशीतितमः स्वातन्त्र्यदिवसः महता उत्साहेन, देशभक्तिभावेन राष्ट्रप्रेम्णा च समायोजितः।

• कार्यक्रमस्य प्रारम्भः प्रातः ८:१५ वादने अभवत्। अस्मिन् कार्यक्रमे माननीयः प्राचार्यः, उपप्राचार्यः, प्राध्यापकाः, शिक्षकाः, शिक्षकेतरकर्मचारिणः, प्रशिक्षु-छात्राः, नर्सिङ्-छात्राः तथा महाविद्यालयस्य छात्राः च उपस्थिताः आसन्।

• प्रातः ८:३० वादने माननीयेन प्राचार्येण डॉ. सीबा प्रसाद-महोदयेन ध्वजारोहणं ध्वजवन्दनं च कृतम्। ततः राष्ट्रगानस्य प्रस्तुति अभवत्। तेन समग्रे वातावरणे राष्ट्रगौरवस्य, एकतायाः, देशभक्तेः च भावना जागृता।

• ध्वजारोहणानन्तरं माननीयः उपप्राचार्यः डॉ. संजय कमले-महोदयः स्वप्रेरणादायके सम्बोधने स्वातन्त्र्यस्य महत्त्वं, अनुशासनं, शिक्षायाः महत्त्वं, कर्तव्यनिष्ठां तथा समाजस्य राष्ट्रस्य च प्रति उत्तरदायित्वं विषये मार्गदर्शनम् अकरोत

• ततः डॉ. संदीप-महोदयेन देशभक्तेः, शिक्षायाः तथा युवा-पीढ्याः उत्तरदायित्वस्य च विषये प्रेरणादायकं विचारप्रदं च भाषणं प्रस्तुतम्।

• सांस्कृतिककार्यक्रमस्य अन्तर्गतं प्रथमवर्षीय-छात्रैः संस्कृत-समूहगीतस्य मनोहरं प्रस्तुतिकरणम् कृतम्। अनेन भारतीयसंस्कृतेः, संस्कृतभाषायाः तथा राष्ट्रप्रेम्णः भावनायाः सुन्दरः समन्वयः प्रदर्शितः।

• ततः प्रेरणा नर्सिङ् संस्थानस्य प्राचार्या श्रीमती सोनल पटेल-महोदया उपस्थितान् सम्बोध्य शिक्षायाः, अनुशासनस्य, समर्पणस्य तथा सेवाभावस्य महत्त्वं प्रतिपादितवती।

• अनन्तरं नर्सिङ्-छात्रैः उत्साहपूर्णं देशभक्तिपरं नृत्यप्रस्तुतिकरणम् कृतम्, यत् उपस्थितैः सर्वैः हर्षेण प्रशंसितम्।




### प्रमाणपत्र-वितरणं सम्मान-समारोहश्च

• अस्मिन् अवसरे Spark 4.0 – 2025-26 इत्यस्मिन् कार्यक्रमे उत्कृष्टसिद्धिं प्राप्तवते महाविद्यालयस्य छात्राय पार्थ तन्ना-महोदयाय प्रशंसापत्रं प्रदाय सम्मानितः कृतः।

• तस्य मार्गदर्शिकायै डॉ. स्वाति दाभी-महोदयायै अमूल्य-मार्गदर्शनस्य सहयोगस्य च कृते प्रमाणपत्रं प्रदाय सम्मानः कृतः।

• अनेन सम्मानसमारोहेण संस्थया शैक्षणिकश्रेष्ठतायाः, प्रतिभायाः, नवाचारस्य तथा मार्गदर्शकानां योगदानस्य प्रोत्साहनं कृतम्।

### कार्यक्रमस्य सञ्चालनम् एवं आयोजनम्

• सम्पूर्णस्य कार्यक्रमस्य सुन्दरं सुव्यवस्थितं च सञ्चालनं श्री विधिराज चौहान तथा बंसरी परमार इत्याभ्यां कृतम्।

• सम्पूर्णस्य कार्यक्रमस्य आयोजनं डॉ. अक्षया याज्ञिक, डॉ. रविना बारिया, भूमिः परमार तथा योगिता पटेलिया इत्येषां सहयोगेन सम्पन्नम्।

• कार्यक्रमस्य सफलतायै महाविद्यालयस्य समस्तशिक्षकाणां, शिक्षकेतरकर्मचारिणां, प्रशिक्षु-छात्राणां तथा छात्राणां सक्रियः सहयोगः सहभागिता च आसीत्।

• अन्ते उपस्थितेभ्यः सर्वेभ्यः अल्पाहारस्य वितरणं कृत्वा कार्यक्रमस्य हर्षोल्लासपूर्णं समापनम् अभवत्। समग्रे कार्यक्रमे छात्रेषु देशभक्तेः, राष्ट्रैक्यस्य, अनुशासनस्य, संस्थाप्रेम्णः तथा राष्ट्र-समाजयोः प्रति उत्तरदायित्वस्य भावना सुदृढा अभवत्। छात्राणां, प्राध्यापकानां, कर्मचारिणां, प्रशिक्षु-छात्राणां तथा नर्सिङ्-छात्राणां सक्रियसहभागितया अशीतितमः स्वातन्त्र्यदिवस-समारोहः स्मरणीयः, गौरवपूर्णः सार्थकश्च अभवत्।




**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अतीव विचित्राः वार्ताः मया श्रुताः। एका महिला प्रतिदिनं शताधिक- गृध्रेभ्यः विपुलं मांसं दत्तवती अस्ति। तेन कारणेन तस्याः प्रतिवेशिनः कुपिताः जाताः। अतः न्यायालयेन सा निवारिता।

**नन्दिनी-** अहो! गृध्राणां पोषणम् अतीव भयङ्करम्! अन्या काचित् वार्ता मया श्रुता। एकेन कृषकेण कृत्रिमबुद्ध्या उपदिष्टं विषम् औषधरूपेण क्षेत्रे प्रयुक्तम्। तेन तस्य सम्पूर्णं सस्यं नाशितम्।

**काव्या-** कष्टकरम्! यन्त्र-बुद्धौ विश्वासः न कर्तव्यः। अपि च अपरा हास्यकरी घटना अपि श्रुता। एकस्मिन् विमाने एकेन बालकेन सुरक्षा-पट्टिका न बद्धा। तेन कारणेन सम्पूर्णं विमानम् एव स्थगितम्।

**नन्दिनी-** हा! हा! एकस्य बालकस्य हठेन विमानं बाधितम्! अन्तिमा वार्ता अतीव खेदकरी किन्तु विचित्रा अस्ति। एकः आरक्षकः मृतः जातः। परन्तु द्विचत्वारिंशद्दिनानन्तरं यन्त्रप्रणाल्या तस्मै सन्देशः प्रेषितः। "त्वं स्वस्थः जातः" इति तस्मिन् सन्देशे लिखितम्।

**काव्या-** अहो यन्त्राणां प्रमादः! शोकाकुल-परिवाराय इदं कष्टकरम्। विचित्राः खलु अद्यतनीयाः वार्ताः।

# राजकीय-वरिष्ठ-माध्यमिक-विद्यालये कनेड़ इत्यत्र सोत्साहं सम्पन्नः स्वतन्त्रता-दिवसोत्सवः






**हिमसंस्कृतवार्ता कनेड़।** धर्मशाला शिक्षाखण्डार्तर्गतं राजकीय-वरिष्ठ-माध्यमिक-विद्यालये अगस्त-मासस्य पञ्चदशे (१५) दिनाङ्के स्वतन्त्रता-दिवसस्य पावनपर्व महता उत्साहेन हर्षोल्लासेन च आचरितम्। अस्मिन् अवसरे स्वतन्त्रता-दिवस-विषयाधारिता एका ज्ञान-प्रश्नोत्तरी-प्रतियोगिता (क्विज्) आयोजिता। अस्यां प्रतियोगितायां शिवाजी, अशोक, टैगोर इति त्रिभिः छात्र-समूहैः प्रतिभागित्वं कृतम्। स्पर्धायां टैगोर-समूहेन प्रथमं स्थानम्, अशोक-समूहेन द्वितीयं स्थानं तथा शिवाजी-समूहेन तृतीयं स्थानं प्राप्तम्। तदनन्तरं भाषण-प्रतियोगिता आयोजिता, यस्यां नव (९) छात्रैः भागः गृहीतः, विद्यालयस्य शिक्षकाः सोनिका चौधरी, विनीतपंकजः, कुलताराणा भाषणप्रतियोगितायाः निर्णायकपदं ग्रहीतवन्तः। अस्यां प्रतियोगितायां 'अक्ष' नाम्नः छात्रस्य 'व्यसन-मुक्ति-अभियानम्' (नशामुक्त-अभियानम्) इति विषये उद्बोधनं सर्वाधिकं प्रभावशालि प्रशंसनीयं चासीत्। समारोहस्य अध्यक्षा प्रधानाचार्या सुरिन्द्रा कुमारी महोदया छात्रेभ्यः स्वतन्त्रता-दिवसस्य महत्त्वं विस्तरेण प्रतिपादितवती। सा छात्रान् स्वतन्त्रता-सङ्ग्रामे आत्मबलिदानं दत्तवतां क्रान्तिकारिणां जीवनविषयक-लेखानां पठनाय लेखनाय च प्रेरयामास। कार्यक्रमायोजकः डा. अमनदीप शर्मा कार्यक्रमस्य कुशलं सञ्चालनं कुर्वन् 'स्वतन्त्रतायाः मूल्यम्' इति विषये छात्रान् सम्बोधितवान्। ततः छात्राः देशभक्तिपूर्णाः सांस्कृतिक-प्रस्तुतीः प्रदत्तवन्तः। अन्ते मिष्टान्न-वितरणेन सह राष्ट्रगान-ध्वनौ अस्य राष्ट्रिय-महोत्सवस्य शान्तिपूर्णं समापनम् अभवत्।

# “भर्तृहरेः वैराग्यकथा”

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्र**

अस्ति समस्तवस्तुविस्मितदेवा, गुणपराभूतपुरन्दर निवासा उज्जयनी नाम नगरी। तत्र सामन्तसीमन्तिनौ, सीमान्तसिन्दूरारुणित चरणकमलयुगलौ भर्तृहरिर्नाम राजाऽभूत। तस्यानुजो विक्रमादित्यनामा सकलकला प्रवीणः, समस्तशास्त्रभिज्ञश्च। भर्तृहरिभार्या रूपलावण्यादि- गुणविनिर्जित- सुराङ्गना अनङ्गसेना नामभूत।

तस्मिन् नगरे ब्राह्मणः क्वचित् सकलशास्त्रविचक्षणः, विशेषतो मन्त्रशास्त्रवित्, परं दरिद्रो। मन्त्रानुष्ठानेन भुवनेश्वरीमतोषयत्। तुष्टा सा ब्राह्मणमवादित्-
“भो ब्राह्मण! तव मन्त्रानुष्ठानेन भक्त्या च प्रसन्नाऽस्मि, वरं वृष्णीव”। ब्राह्मणेनोक्तं- “यदि मे प्रसन्नाऽसि, तर्हि मां जरामरणवर्जितं कुरुष्व” इति।
ततो देव्या दिव्यमेकं फलं दत्तं, भणितञ्च- “भो पुत्र! फलं भक्षय, जरामरणरहितो भविष्यसि” इति। तदा ब्राह्मण तत फलं गृहीत्वा, भवनं प्रत्यागत्।
सः चिन्तितम् परोपकारिणः पुरुषस्य एतत् फलं श्रेयसे भवति। इति विच्चार्य, “एतत् फलं राज्ञे दीयते चेत्, स राजा जरामरणवर्जितो भूत्वा सर्वोपकारकर्ता भविष्यति” इति सञ्चित्य तत् फलं गृहीत्वा राजसमीपमागत्य आशीर्वादपूर्वकं राजहस्ते फलं दत्वाऽब्रवीत्, भो राजन! देवताप्रसादलब्धम्, इदमपूर्वफलं भक्षय, जरामरणवर्जितो भविष्यसि। राजा च तत्फलं गृहीत्वा अग्रहारान् दत्वा विसृज्य विचारयति स्म- अहो! ममैतत्फलंभक्षणादमरत्वं भविष्यति। मम अनङ्गसेनायाम् अतीव प्रीतिः सा मयि जीवीत्येव मरिष्यति, तदा तस्या वियोगदुःखं सोढं न शक्नोमि। तस्मादिदं फलं मम प्राणप्रियायै अनङ्गसेनायै दास्यामि।




इत्यनङ्गसेनाय आहूय दत्तवान्। तस्या अमङ्गसेनायाः कश्चिन्माथुरिको दासः प्रियतमोऽभूत। सा च विचार्य तस्मै फलं ददो। तस्य माथुरिकस्य काचित् दासी प्रियतमाऽऽसीत्। तस्यै स प्रादात्; तस्या अपि कस्मिनश्चित् गोपालके प्रीतिः सा तस्मै दत्तवती। तस्यापि कस्याश्चित् गोमयधारिण्यां प्रीतिः, सोऽपि तस्यै प्रायच्छत्। ततः सा गोमयधारिणौ गोमयं धृत्वा, गोमयभाजनं शिरसि निधाय, तदुपरि तत फलं निक्षिप्य, यावद्राजवीथ्यामार्गच्छति, तावद्रजा भर्तृहरिः राजकुमारैः सह विहारार्थं बहिर्गतः। तं दृष्ट्वा अप्रार्थितयाऽपि तया तस्मै सानन्दं तत्फलं स्वयमर्पितम्, राजाऽपि तदादाय सत्वरं गृहमागतः।ततो ब्राह्मणमाकर्ण्य अवदीत्,-‘’भो ब्राह्मण! त्वया यत् फलं दत्तं, तादृशमन्यत् फलं सत्यं न लभ्यते किम्? ब्राह्मणेनोक्तं- भो राजन! तत् फलं देवतावरप्रसादलभ्यं दिव्यं, तादृशमन्यत् नास्ति। राजा तु साक्षादीश्विरः तस्याग्रे अनृतं न वाच्यम्, स देवतेव निरीक्षणीयः। ततो राजा भणितं- “तादृशं फलं दर्शयति, काचित्, तत्कथं सम्भवति? ब्राह्मणोऽब्रवीत्,-‘’तत फलं भक्षितं वा न वा?” राजाऽभणत्- “न मया भक्षितं मम प्राणवल्लभायै अनङ्गसेनायै दत्तम्।” ब्राह्मणेनोक्तं- तां पृच्छत्, तत् फलं किं कृतम्?” इति।
ततो राजा तामाकर्ण्य, “तत् फलं किं कृतम्? इति शपथं कारयित्वाऽपृच्छत्। तयोक्तं- ‘माथुरिकाय दत्तम्’ इति अकथयत्; ततः स आकातितः [आहूतः] पृष्टः, ‘दास्यै दत्तम्’ इति अकथयत्, दासो गोपालकाय, गोपालकः गोमयधारिण्यै। ततो राजा च प्रलप्य परमविषादं गत्वा इमौ श्लोको अपठत्- “गृहान्ति विपिने व्याधा विहङ्ग चलितास्थितम्। सरितवृतवती नावं न स्त्रीणां चपलां गतिम्।”

**“नृपस्य चित्तं, कृपणस्य वित्तं, मनोरथाः दुर्जनमानवानाम्।**
**त्रिया चरित्रं, पुरुषस्य भाग्यम् देवो न जानाति कुतो मनुष्याः।।”**

परमं वैराग्यं गतः भर्तृहरि विक्रमार्कं राज्ये चाभिषिच्य च स्वयं वनं जगाम।

# शौर्यस्य त्यागस्य बलिदानस्य च सुदीर्घतमागाथा : स्वातन्त्र्यदिवसम्



**- आचार्यः डॉ. रविरंजनकुमार झा।** अस्माकं देशे भारतवर्षे शनिवासरे अशीतितमं स्वातन्त्रतादिवसम् आयोज्यते। स्वतन्त्रतादिवसो न केवलं एकः समारोहो वर्तते अपि तु शौर्यस्य त्यागस्य बलिदानस्य च अत्यन्तसुदीर्घतमा गाथा वर्तते, आङ्गलशासकस्य यदा अत्र अस्मदीये देशे शासनं आसीत्, तदा सर्वे भारतीयाः तस्य निर्देशने स्वजीवनं यापितुं बाध्य आसन्, तेषामेव आदेशेन भोजनं, शयनं, काठिन्यतमं कार्यं, विश्रामम् इतोऽपि सर्वं कर्तुं विवश आसन्, अतः तुलसीकृत मानसे हिन्द्यामेका उक्ति पौनः पुण्येन सन्दर्भेऽस्मिन् मानसपटले आयाति **"पराधीन सपनेहु सुख नाहि"** इति तस्मिन्नेव समये यदा भारते आङ्गलशासनम् आसीत् तदा भारतीयाः श्वासोऽपि स्वेच्छया ग्रहीतुं न शक्नुवन्ति, सर्वे अस्मदीयाः देशवासिनः परस्परं विचार्य संघटितं भूत्वा आङ्गलशासनं प्रति विरोधप्रदर्शनं कृत्वा स्वाधीनतां प्राप्तवन्तः, तस्मिनेव क्रमे अनेके भारतमातुः वीरपुत्राः बलिदानं दत्वा, सम्पूर्णे भारते प्रचलिते विरोधप्रदर्शने अस्मदीयाः देशवासिनः भारतीयाः दिवङ्गताः, येषां बलिदानस्येतिहासस्य स्मरणदिवसरुपेण आभारतम् अद्य पञ्चदश दिनाङ्के अगस्तमासे स्वतन्त्रतादिवस समायोज्यन्ते, अयं दिवस सम्पूर्णभारतवासिनां कृते अपारहर्षस्य, त्यागस्य, बलिदानस्य, शौर्यस्य, पराक्रमस्य, स्वाधीनताप्राप्तस्य दिवसोऽस्ति।अस्मिनेवोपक्रमे स्वाधीनतासंग्रामे भगतसिंहः लालालाजपतरायः सुभाषचंद्रबोसः चन्द्रशेखर आजादः, मङ्गलपाण्डेयः इत्यनेन अमरत्वं प्राप्तम्। अयमेवोपलक्ष्ये अद्य द्विसहस्त्रषड्विंशतितमे वर्षेऽगस्तमासीये पञ्चदशदिनाङ्के स्वातन्त्र्योत्सवे बिहारराज्यान्तर्गते वैशालीमण्डलान्तर्गते हरिपुरेऽनुमण्डले प्रखण्डे चैव सेन्दुआरीशुभेऽवस्थिते "सरस्वती विद्या निकेतनम् (माडल स्कूलः)" पूर्वतनीयेन नाम्ना "राजकीयकृत उच्चविद्यालयः, सेन्दुआरी, हरिपुरम्" इति प्रखण्डे, अनुमण्डले मण्डले लोके वा चेति अभिज्ञायते। अत्रत्ये हर्षोल्लासेन स्वातन्त्र्योत्सवं समायोज्य अनेके संदेशाः समेषामुपस्थितानामन्येषां छात्रछात्रृणां ग्रामवासिनां कृते दत्ताः। स्वातन्त्र्यं किम्? इत्युक्ते स्वतन्त्र इत्यस्य पदस्य भाववचनात् स्वातन्त्र्य अथ च स्वतन्त्र्यमस्ति अस्य इति स्वातन्त्र्य, स्वस्य तन्त्रं, स्वस्य अर्थात् आत्मनः तन्त्रम् अर्थात शासनम्, आत्मनः शासनम् इति स्वतन्त्रं, स्वतन्त्रमस्तीति स्वातन्त्र्य इति सिद्धम्। इदानी पराधीनता नास्ति अपि तु स्वस्य इच्छया एव सर्वे सर्वं कर्तुं शक्नुवन्ति। परञ्च इतोपि विचारणीयः।

**किम् वयं सामाजिकदृष्ट्या स्वातन्त्र्यमस्ति?**

एतेषामुत्तरे सर्वे मौनं वर्तन्ते किमर्थम्? मनुष्यानां समूहः समाजः, पशूनां समूहः समजः इति पदद्वयं अस्माकं पुरतो विद्यते, मनुष्यभिन्नः पशु इति, मनुष्यानां अर्थात् अस्मदीयानां समूहः समाजः, समाजे भव इति सामाजिकः, तत्र ठक् इति प्रत्ययेन समाजे ति शब्दे योजितुं सामाजिकः इति निष्पद्यते अस्यार्थ भवति समाजे भव इति, किम् वयं समूहे स्मः, नैव, किमर्थम्, इदानीं मनुष्येषु विचारेषु वैविध्यता वर्तते, यदा विचारे समानता न स्यात्तदा कथं एकरुपता भविष्यति, यदा एकरुपता न स्यात्तदा कथं समाजस्य परिकल्पना भविष्यति, इदानीमपि मनुष्यानां विचार व्यावहारं संशोधनीयम्, तदैव वास्तविकं स्वातन्त्र्यस्य परिकल्पना अथ च स्वातन्त्र्यं भविष्यति। इति संदेशेन सह अस्मदीयेन प्रधानाचार्येन कृष्णकान्तरायमहोदयेन झण्डोतोलनं कृतम्,ततः परं वरीयः शिक्षकः श्रद्धेय- महेशबाबूमहोदयेन स्वागतभाषणेन समेषाम् अतिथिनामुपस्थितानां ग्रामीणवासिनामन्येषां छात्र-छात्रृणां स्वागतं कृतं, ततः परं विद्यालयीय सङ्गीतशिक्षिका खुशबूमहोदयायाः निर्देशने सांस्कृतिक- कार्यक्रमस्यायोजनमभवत् तत्र अनेके छात्रछात्राः भागं ग्रहीताः।